# उपसंहारः

# उपसंहारः

भारतीयसंस्कृतेः मूलरूपं वेदेषु एव प्राप्यते । महाराजमनुर्मनुस्मृतौ “सर्वज्ञानमयो हि सः, सर्वं वेदात्प्रसिद्ध्यति” इत्यादिभिर्वचनैः वेदमहत्तामुद्घोषयति। वेदार्थावबोधाय तत्स्वरूपाद्यावगमनाय वा तत्स्वराद्यावगमनाय तद्विनियोगज्ञानाय चासीत् महत्यावश्यकता केचाञ्चित् सहायकग्रन्थानाम्, एतदभावपूर्तये एव जनिरभूद् वेदाङ्गानाम्। वेदान्गस्य नेत्ररूपज्योतिषशास्त्रस्यत्रिषु स्कन्धेषु होरास्कन्धः जातक-ताजिक-प्रश्न-मुहूर्तादिविधिभिः मानवस्य व्यष्टिगतफलसूचकः, भूप्राकृतिकलक्षणैः समस्तजगतः समष्टिगतफलनिर्देशकः संहितास्कन्धोऽवतिष्ठते। अद्यतनीयः युगः वैज्ञानिकताऽऽधारितोऽस्ति, युगेऽस्मिन्प्रत्येकविषये समये-समये अनुसंधानस्यावश्यकता भवति । यदि ज्योतिश्शास्त्रोपरि अध्ययनं भवेत्तर्हि तथ्यमिदं दृष्टिपथमायाति यत् मुहूर्ते, उत्सवे, यात्रायां जातकस्य फलादेशकथनेच सर्वत्र स्पष्टग्रहैरेव फलस्फुटत्वं भवति । इदानीं भारतवर्षे बहूनि पञ्चाङ्गानि प्रचलितानि सन्ति तत्राधिकांशपञ्चाङ्गानि प्राचीनपरम्परागत-सारणीभिः कृतानि सन्ति । वर्षशतैरपि तासु सारणीषु किञ्चिदपि संशोधनं नाभूत् तद्वदेव विविधफलितग्रन्थेष्वपि परिवर्तनं न जातं कारणं यत् पञ्चाङ्गानि गणिताऽऽधारेण निर्मितानि भवन्ति तथैव फलितग्रन्थाः ग्रहस्थितिं दृष्ट्वा निर्मिताः सन्ति ज्योतिर्विदैः । अतः अनयोः समीक्षात्मकमध्ययनं कृत्वा नवीनरहस्योद्घाटने दृग्सिद्धशोधोऽयंलोकोपकारित्वमुपयास्यतिइति मत्वा मया शोधप्रबन्धोऽयं रचितः। “ज्योतिषशास्त्रफलं पुराणगणकैरादेश इत्युच्यते” । अर्थात् शात्रमिदं फलादेशशास्त्रं वर्तते । विशेषतः होराशास्त्रं तु फालादेशशास्त्रमेवास्ति। ज्योतिषशास्त्रस्य स्कन्धत्रयं सर्वविदितन्तत्र पञ्चस्कन्धम् अष्टस्कन्धं च

किञ्चिन्निगद्यते। फलादेशनाम ग्रहपिण्डानान्नक्षत्राणाञ्च परस्परसंयोगेन मानवजीवनोपरि पतितप्रभावः। अस्य प्रभावविशेषस्य ज्ञानं ज्योतिषशास्त्राधीनं वर्तते । आचार्यैः ज्योतिषशास्त्रमिदं ग्रहनक्षत्राणामधिकृत्यकृतं शास्त्ररूपेण परिगणितं जातम्। "ग्रहनक्षत्राणां गतिमधिकृत्यं कृतं शास्त्रं ज्योतिषशास्त्रमुच्यते"। ग्रहकृतशुभाशुभफलज्ञानं लग्नाश्रितं जातम्, लग्नज्ञानं तु स्फुटग्रहाश्रितं वर्तते । लग्नमिव नवांशं तथा च नाडीज्योतिषं फलादेशकथने अतीवोपयुक्ते स्तः । जातक(होरा)स्कन्धमधिकृत्य यदि वयं फलादेशकर्तुं प्रविश्यतामस्तर्हि जातकस्य भेद-प्रभेदादीदमङ्गीभूतत्वे विद्यमानानां फलितपरकविविधसिद्धान्तानामनुशी-लन्म कृत्वा मानवोपयोगितथ्यानान्विष्य साधयितुं पारयामः । होराशास्त्रान्त-र्गतविद्यमानानामनेक शुभाशुभफल-लक्षणान्याधृत्य शुभाय प्रयासो कृतः । अहं मन्ग्र यच्छोधोऽयंमानवोपगित्वे सफलतायास्यतिनूतन तथ्यानामन्वेषणे निश्चिततयाऽपूर्वं कार्यं भविष्यति इत्यत्र नास्ति सन्देहावसरः ।

ज्योतिषशास्त्रं फलकथनाय प्रशस्तम्, ज्योतिषशास्त्रस्य स्कन्धत्रयैस्सम्व-लितमिदं शास्त्रं ग्रहचारानाञ्च निरूपणं करोति, विशेषतः तृतीयो होरास्कन्धः समग्रं मानवजीवनं निरूपयति । आधानात्प्रसवान्तं प्रसवात्जीवनस्यावसानपर्यन्तं समग्रं सम्भाव्यमानं शुभाशुभं निरूपयति । एवं ज्योतिषस्य त्रयः स्कन्धाः चिरकालादेवाधुनिकविज्ञानस्याभावपूरकत्वेन तिष्ठन्ति स्म। परमकरुणालयस्य सर्वभूतहृदयस्थस्य भगवतो श्रीकृष्णस्य वात्सल्यभावभरितायामातुश्च परमकृपया "ज्योतिषीयहोरासन्दर्भे नवमांशवर्गस्य विशिष्टमध्ययनम्" इतिविषयमादाय संग्रथितोऽयं शोधप्रबन्धः साम्प्रतं निर्विघ्नतया पूर्णतामेतीति महान् हर्षविषयो मत्कृते ।

मदीये शोधकार्येऽस्मिन्सप्त अध्यायास्सन्ति । प्रथमेऽध्याये संस्कृतवाङ्गमये ज्योतिष-शास्त्रस्य वैशिष्टयम्, ज्यौतिषशास्त्रस्य परिभाषा, ज्योतिषशास्त्रस्यैतिह्यम्, ज्योतिषशा-स्त्रस्योत्पत्तिः, प्राग्वैदिककाले ज्योतिषस्वरूपम्, ज्योतिषशास्त्रस्य स्वरूपम्, ज्योतिषशास्त्र-स्योद्देश्यम्, ज्योतिषशास्त्रस्य वेदाङ्गत्वम्, ज्योतिषशास्त्रस्य प्रत्यक्षत्वम्, ज्योतिषशास्त्र-शास्त्रस्य विकासः, ज्योतिषशास्त्रस्य त्रिस्कन्धात्मकप्रभेदाः- सिद्धान्तस्कन्धः, संहितास्कन्धः, होरास्कन्धः, ज्योतिषशास्त्रस्य स्कन्धपञ्चकम्, ज्योतिषशास्त्रस्य स्कन्धाष्टकम् ।द्वितीयेऽध्याये ज्योतिषशास्त्रे होरायाः परिज्ञापनं स्कन्धविवेचनं वा होराशास्त्रपरिचयः, होराशब्दस्य व्युत्पत्त्यर्थाः, होराशास्त्रस्य महत्त्वम्, होराशास्त्रस्य विषयः, होराशास्त्रस्य स्वरूपम्, होराशास्त्रस्य वैशिष्ट्यम्, होराशास्त्रस्योपयोगिता । होराशास्त्रस्य विभागः- जातकशास्त्रम्, ताजिकशास्त्रम्, प्रश्नशास्त्रम्, रमलशास्त्रम्, स्वप्नशास्त्रम् । होराशास्त्रस्य विशिष्टाः आचार्याः- वराहमिहिरः, कल्याणवर्मा, समरसिंहः, वैद्यनाथः, नीलकण्ठः । होराशास्त्रस्य विशिष्टाः ग्रन्थाः- बृहत्पाराशरहोराशास्त्रम्, बृहज्जातकम्, लघुजातकम्, सारावली चेति ।

तृतीयेऽध्याये होराशास्त्रे ग्रहाणां बलाबलविचारः, होराशास्त्रे ग्रहाणां परिचयः, सूर्यः (सरति इति सूर्यः), चन्द्रः, भौमः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः, सूर्यादिग्रहाणां बलाबलविचारः, पञ्चवर्गीबलम्, गृहबलम्, उच्चबलम्,

हद्दाबलम्, द्रेष्काणबलम्, नवांशबलम्, पञ्चवर्गीयविंशोपकबलम्, होराशास्त्रे ग्रहाणां षड्विधबलम्, स्थानबलम्, उच्चबलम्, सप्तवर्गजबलम्, युग्मायुग्मभांशबलम्, नवांशबलम्, द्रेष्काणबलम्, दिग्बलम्, कालबलम्, चेष्टाबलम्, नैसर्गिकबलम्, दृष्टि(दृग्)बलम्, ग्रहाणां विंशोपकबलम्, ग्रहाणामंशकबलम्, ग्रहबलस्य ग्रहाणां च मानवजीवने प्रभावः वर्णितः । चतुर्थेऽध्याये होराशास्त्रे भावबलप्रयोजनं भावफलञ्च, होराशास्त्रे भावाधिपतिबलम्, भावबलप्रयोजनम्, होराशास्त्रे भावाधिपतिबलम्, भावानां दिग्बलम्, भावदृग्-बलम्, विंशोपकबलम्, पञ्चवर्गीयविंशो-पकबलम्, षोडशवर्गाणां विंशोपकबलम्, षड्वर्गाणां विंशोपकम्, सप्तवर्गाणां विंशोपकम्, दशवर्गाणां विंशोपकम्, षोडशवर्गाणां विंशोपकम्, विश्वकबलस्पष्टानयनविधिः, होराशास्त्रे अतिपरिचितषड्वर्गी-यस्वरूपम्, शुभाशुभफलादेशे होराशास्त्रस्य प्रमुखतत्त्वानि वा त्रीण्युपकरणानि, भावानां परिचयः, द्वादशभावेभ्यः विचारणीयविषयाणां विवेचनम्, द्वादशभावानां कारकग्रहाः, भावफलविचारः च कृतो वर्तते ।पञ्चमेऽध्याये शुभाशुभफलादेशे नवांशप्रयोजनं वा फलादेशस्याधारभूतसिद्धान्ताः,शुभाशुभफलस्य सामान्यसिद्धान्ताः, विशिष्ट-सिद्धान्ताः, मानवजीवने फलितशास्त्रस्योपयोगिता, षोडशवर्गाणां सामान्यफलविचारः, होरावर्गः, द्रेष्काणवर्गः, नवांशवर्गः, सप्तमांशवर्गः, दशांशवर्गः, द्वादशांशवर्गः, षोडशांशवर्गः, त्रिंशांशवर्गः, षष्ठ्यंशाधिपतयः,

षोडशवर्गलग्नेषु विचारणीयत-त्तत्पदार्थविशेषनिरूपणम्, षोडशवर्गादीनां विशेषफलविचारः विहितः।षष्ठेऽध्यायेहोराशास्त्रे नवांशस्य मीमांसा, पराशरीयषोडशवर्गेषु नवांशाय अत्यधिकं महत्वं किमर्थं प्रदत्तम् ?,नवमांशवैशिष्ट्यं महत्त्वं वा तथा फलनिरुपणम्, वर्गोत्तमनवांश:, नवांशे वर्गोत्तमग्रह-भावयोः महत्त्वम्, फलितज्योतिषे नवांशस्य महत्ता, विवाहे नवांशस्य भूमिका (Role of Navansh in A Marriage), नवांशलग्ने ग्रहफलम्, नवांशराशी फलम्, सर्वेषां ग्रहाणां नवांशे सूर्यफलम्, वैवाहिकजीवनस्य सुखशान्त्यर्थं मेलापकमहत्त्वं नवांशस्य भूमिका च, मङ्गलदोषेऽपि नवांशमहत्त्वम् च प्रदर्शितमस्ति । सप्तमेऽध्याये नाडीग्रन्थेषु नवमांशविचार:, नाडी परिचयः, नाडीनां क्रमः, चरराशेः क्रमः, स्थिरराशेः क्रमः, द्विस्वभावराशेः क्रमः, जन्मकुण्डल्यां विविधनाडीविचार:, नाड्यः कयारीत्या फलं ददन्ति इति विश्लेषणम्, लग्नस्य कालात्मकनाडीफलम्, भावत्रयस्य नाडीफलम्. चरलग्नविचार:, स्थिरलग्नविचार:, द्विस्वभाव लग्नविचार:, नाड्यां पितृभावः, नाडीग्रन्थानुसारेण नवमांशस्य गोचरग्रहस्य परिभ्रमणम्, शुभग्रहाणां गोचरफलम्, गोचरस्थशनेः द्वादशभावेषु भ्रमणफलम्, नाड्याऽऽधारेण नवांशस्य विशिष्टमध्ययनम्, नाडीग्रन्थेषु नवमांशानां वर्गीकरणम्, स्वक्षेत्रनवांश:, विकटांश:, भावोत्तम:, ओजमांश:, मेषादिनवांशा:, भावमध्यनवांश:, पुष्करनवांश:, खरनवांशाऽऽधारेण भविष्यत्कालीनं (६४तमनवांशस्य) फलम्,

निधनांश-अष्टमांशयोर्मध्ये भेदः, नीचनवांशस्थितग्रहफलम्, चरस्थिरराशयोरन्तिमनवांशेऽवस्थि-तग्रहफलम्, राशितुल्यनवांशं नवांशतुल्यराशीः, गोचरस्थ ग्रहानुसारेण शुभाशुभघटनायाः निर्देशः, मेषादिराशीनां स्वराधारेण नवंशानुरूपफलकथनं वर्णितम् ।

"बलीयसी केवलमीश्वरेच्छा" इत्यादिप्रमाणैः सुसिद्ध्यति यत् सकलकर्मणां प्रेरक ईश्वर एव भवति । अतः सर्वादौ ममाराराध्य सर्वविदः विघ्नदुःखशोकविनाशकस्य भगवतः श्रीचरणकमलेष्वेव"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये" इति भावनाभरितमानसोऽहं कार्यमिदं समर्पयामि सश्रद्धं स्वीयं प्रणतिनिवेदनं च निवेदयामि ।

उपर्युक्तविवेचनानन्तरं वक्तुं शक्यते यद्विषयास्तावदतीगभीराः मनीषिभिरेव विचारणीयाः इत्यत्र नास्ति संदेहः । उक्तञ्च महाकविकालिदासेन- "क्व सूर्यप्रभवो वंशः क्वचाल्पविषया मतिः" इत्युक्तिभिः अहं वक्तुं पारयामि यतोहि क्व ज्योतिषसिद्धान्तोऽयं महाद्विषयः, क्व च मदीयाल्पदृष्टिः, तया कथमहंवर्णितुं प्रभवामि । याश्च त्रुटयः स्युः ताः परिष्कृत्य समाधानाय च सुधीभिः विद्वद्भिः क्षन्तव्योऽयञ्जनः इति ।